# ४६. यः - सः , या-सा

## पठत अवगच्छत

| यः ------सः | या------सा |
|---|---|
| यः लिखति सः लेखकः। | या लिखति सा लेखिका । |
| यः कृषि-कार्यं करोति, सः कृषकः। | या गायति सा गायिका । |
| यः चित्रं रचयति सः चित्रकारः। | या नृत्यं करोति सा नर्तकी । |
| यः पचति सः पाचक । | या पचति सा पाचिका । |
| यः काष्टं तक्षति सः तक्षकः। | या विक्रयणं करोति सा विक्रयिका । |
| यः अध्यापयति सः अध्यापकः। | या अध्यापयति सा अध्यापिका |
| यः वाहनं चालयति सः चालकः। | या यानं चालयति सा चालिका । |
| यः निरीक्षणं करोति सः निरीक्षकः। | या चिकित्सां करोति सा वैद्या । |
| यः श्रावयति सः श्रावकः । | या कार्यं करोति सा कार्यकर्त्री। |

## अभ्यासः

### १. उचितपदम् उपयुज्य रिक्तस्थानानि पूरयतु ---

| | |
|---|---|
| यः ज्ञातुम् इच्छति सः **<u>जिज्ञासुः</u>** । | या निरीक्षणं करोति सा---------- |
| यः शास्त्रं जानाति सः------ | या तन्त्रं जानाति सा---------- |
| यः क्रीडति सः --------------- | या नयति सा ------------------ |
| यः सिञ्चति सः------------- | या शिक्षयति सा------------ |
| यः पाठयति सः --------- | या याजयति सा ----------- |

### २. उदाहरणं दृष्ट्वा एते के इति लिखतु

| |
|---|
| गायकः - यः गायति सः गायकः । |
| धारकः - --------- |
| हारकः - -------- |
| वाहकः - -------- |
| उत्पादकः - -------- |

| |
| --- |
| याजकः - --------- |
| दाहकः - -------- |
| बोधकः - --------- |
| अध्यापिका--------- |
| लेखिका----------- |
| दायिका--------- |
| वाचिका--------- |
| दर्शिका-------- |
| नर्तिका--------- |
| कारिका--------- |